# Vakratunda Stuti by Devarshi

# વક્રતુણ્ડસ્તુતિઃ દેવર્ષિભિઃ પ્રોક્તમ્

## Document Information

Text title : Vakratunda Stuti by Devarshi

File name : vakratuNDastutiHdevarShibhiHproktam.itx

Category : ganesha

Location : doc_ganesha

Transliterated by : Ajit Krishnan

Proofread by : Ajit Krishnan, PSA Easwaran

Description/comments : Mudgalapurana, Khanda 1, Adhyaya 39

Latest update : April 23, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

May 31, 2020

*sanskritdocuments.org*

# વક્રતુણ્ડસ્તુતિઃ દેવર્ષિભિઃ પ્રોક્તમ્

શ્રીગણેશાય નમઃ ।

દેવર્ષય ઊચુઃ -

સદા બ્રહ્મભૂતં વિકારાદિહીનં વિકારાદિભૂતં મહેશાદિવન્દ્યમ્ ।
અપારસ્વરૂપં સ્વસંવેદ્યમેકં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૨॥

અજં નિર્વિકલ્પં કલાકાલહીનં હૃદિસ્થં સદા સાક્ષિરૂપં પરેશમ્ ।
જનજ્ઞાનકારં પ્રકાશૈર્વિહીનં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૩॥

અનન્તસ્વરૂપં સદાનન્દકન્દં પ્રકાશસ્વરૂપં સદા સર્વગં તમ્ ।
અનાદિં ગુણાદિં ગુણાધારભૂતં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૪॥

ધરાવાયુતેજોમયં તોયભાવં સદાકાશરૂપં મહાભૂતસંસ્થમ્ ।
અહઙ્કારધારં તમોમાત્રસંસ્થં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૫॥

રવિપ્રાણવિષ્ણુપ્રચેતોયમેશવિધાત્રશ્વિવૈશ્વાનરેન્દ્રપ્રકાશમ્ ।
દિશાં બોધકં સર્વદેવાધિરૂપં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૬॥

ઉપસ્થત્વગુક્તીક્ષણસ્થપ્રકાશં કરાઙ્ઘ્રિસ્વરૂપં કૃતઘ્રાણજિહ્વમ્ ।
ગુદસ્થં શ્રુતિસ્થં મહાખપ્રકાશં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૭॥

રજોરૂપસૃષ્ટિપ્રકાશં વિધિં તં સદા પાલને કેશવં સત્ત્વસંસ્થમ્ ।
તમોરૂપધારં હરં સંહરં તં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૮॥

દિશાધીશરૂપં સદાશાસ્વરૂપં ગ્રહાદિપ્રકાશં ધ્રુવાદિં ખગસ્થમ્ ।
અનન્તોડુરૂપં તદાકારહીનં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૯॥

મહત્તત્ત્વરૂપં પ્રધાનસ્વરૂપં અહઙ્કારધારં ત્રયીબોધકારમ્ ।
અનાદ્યન્તમાયં તદાધારપુચ્છં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૧૦॥

સદા કર્મધારં ફલૈઃ સ્વર્ગદં તં અકર્મપ્રકાશેન મુક્તિપ્રદં તમ્ ।
વિકર્માદિના યાતનાઽઽધારભૂતં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૧૧॥

અલોભસ્વરૂપં સદા લોભધારં જનજ્ઞાનકારં જનાધીશપાલમ્ ।
નૃણાં સિદ્ધિદં માનવં માનવસ્થં નમામઃ સદા વક્રતુણ્ડં ભજામઃ । ૧૨
લતાવૃક્ષરૂપં સદા પક્ષિરૂપં ધનાદિપ્રકાશં સદા ધાન્યરૂપમ્ ।
પ્રસૂપુત્રપૌત્રાદિનાનાસ્વરૂપં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૧૩॥

ખગેશસ્વરૂપં વૃષાદિપ્રસંસ્થં મૃગેન્દ્રાદિબોધં મૃગેન્દ્રસ્વરૂપમ્ ।
ધરાધારહેમાદ્રિમેરુસ્વરૂપં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૧૪॥

સુવર્ણાદિધાતુસ્થસદ્રઙ્ગસંસ્થં સમુદ્રાદિમેઘસ્વરૂપં જલસ્થમ્ ।
જલે જન્તુમત્સ્યાદિનાનાવિભેદં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૧૫॥

સદા શેષનાગાદિનાગસ્વરૂપં સદા નાગભૂષં ચ લીલાકરં તૈઃ ।
સુરારિસ્વરૂપં ચ દૈત્યાદિભૂતં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૧૬॥

વરં પાશધારં સદા ભક્તપોષં મહાપૌરુષં માયિનં સિંહસંસ્થમ્ ।
ચતુર્બાહુધારં સદા વિઘ્નનાશં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૧૭॥

ગણેશં ગણેશાદિવન્દ્યં સુરેશં પરં સર્વપૂજ્યં સુબોધાદિગમ્યમ્ ।
મહાવાક્યવેદાન્તવેદ્યં પરેશં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૧૮॥

અનન્તાવતારૈઃ સદા પાલયન્તં સ્વધર્માદિસંસ્થં જનં કારયન્તમ્ ।
સુરૈર્દૈત્યપૈર્વન્દ્યમેકં સમં ત્વાં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૧૯॥

ત્વયા નાશિતોઽયં મહાદૈત્યભૂપઃ સુશાન્તેર્ધરોઽયં કૃતસ્તેન વિશ્વમ્ ।
અખણ્ડપ્રહર્ષેણ યુક્તં ચ તં વૈ નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૨૦॥

ન વિન્દન્તિ યં વેદવેદજ્ઞમર્ત્યા ન વિન્દન્તિ યં શાસ્ત્રશાસ્ત્રજ્ઞભૂપાઃ ।
ન વિન્દન્તિ યં યોગયોગીશકાદ્યા નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૨૧॥

ન વેદા વિદુર્યં ચ દેવેન્દ્રમુખ્યા ન યોગૈર્મુનીન્દ્રા વયં કિં સ્તુમશ્ચ ।
તથાઽપિ સ્વબુધ્યા સ્તુતં વક્રતુણ્ડં નમામઃ સદા વક્રતુણ્ડં ભજામઃ ॥ ૨૨॥

મુદ્ગલ ઉવાચ ।
એવં સ્તુત્વા વક્રતુણ્ડં સ્થિતા દેવર્ષયઃ પ્રભો ।
બદ્ધાઞ્જલિપુટાઃ સર્વે તૂષ્ણીંભાવેન માનદ ॥ ૨૩॥

દેવાનાં ચ મુનીનાં સ સ્તુતિં શ્રુત્વા ગજાનનઃ ।
ઉવાચ તાન્ પ્રસન્નાત્મા હર્ષયન્ વચનં મહત્ ॥ ૨૪॥

વક્રતુણ્ડ ઉવાચ ।

શ‍ૃણુધ્વં મુનયઃ સર્વે દેવા મે વચનં મહત્ ।
ભવત્કૃતમિદં સ્તોત્રં મત્પ્રીતેર્વર્ધનં ભવેત્ ॥ ૨૫॥

અનેન સ્તૌતિ યો નિત્યં માં તસ્ય પરિપૂરયે ।
ભોગાન્નાનાવિધાંશ્ચૈવ પુત્રપૌત્રાદિસમ્પદઃ ॥ ૨૬॥

યં યમિચ્છતિ તં તં ચ દાસ્યેઽહં નાત્ર સંશયઃ ।
ભુક્તિમુક્તિપ્રદં ચૈતદ્બ્રહ્મભૂયકરં ભવેત્ ॥ ૨૭॥

નાનાસિદ્ધિપ્રદં ચૈવ હૃદિ બુદ્ધિપ્રકાશકમ્ ।
સુરેન્દ્રૈવધતાં યાતિ યો માં સ્તૌતિ ત્વનેન સઃ ॥ ૨૮॥

સહસ્રાવર્તનાન્ મર્ત્યઃ કારાગૃહગતં નરમ્ ।
મોચયેન્નાત્ર સન્દેહો મત્પ્રિયઃ સર્વદા ભવેત્ ॥ ૨૯॥

અપરાધશતયુક્તો યો વૈભવતિ માનવઃ ।
તસ્યાપરાધસહનં કરોમિ સ્તોત્રપાઠતઃ ॥ ૩૦॥

એકવિંશતિવારં ચ એકવિંશદ્દિનાનિ વૈ ।
પઠિષ્યતિ સદા તસ્મૈ ચિન્તિતં પ્રદદામ્યહમ્ ॥ ૩૧॥

એકવિંશતિકાઃ શ્લોકા ભવદ્ભિર્મત્પ્રિયાત્મકૈઃ ।
કૃતાસ્તૈર્માં સ દેવાસ્તુ સ્તુતા વૈ મુનયોઽખિલાઃ ॥ ૩૨॥

તેન વિઘ્નવિહીનાશ્ચ સ્વધર્મરુચયસ્તથા ।
ભવિષ્યથ મહાભાગા ભુક્તિમુક્તિપદાસ્તથા ॥ ૩૩॥

વરં બ્રૂત મહાભાગા યેષાં યન્મનસિ સ્થિતમ્ ।
તદ્દાસ્યામિ ન સન્દેહઃ સ્તોત્રસન્તોષિતો હ્યહમ્ ॥ ૩૪॥

ઇતિ દેવર્ષિભિર્પ્રોક્તા વક્રતુણ્ડસ્તુતિઃ સમાપ્તા । ૧.૩૯

Encoded by Ajit Krishnan

Proofread by Ajit Krishnan, PSA Easwaran

*Vakratunda Stuti by Devarshi*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*